# 2021

## SANSKRIT — GENERAL

**Paper : GE/CC-2**

**(Sanskrit Prose)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

**Unit : I & II**
**(Marks : 30)**

1. अधोलिखितेषु ***दशानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्। 2×10

(a) 'शुकनासोपदेशः' इति पाठ्यांशः कस्मिन् मूलग्रन्थे अन्तर्भवति? कश्च तस्य रचयिता?

(b) कः शुकनासः? स कमुपदिष्टवान्?

(c) "अतिगहनं तमो यौवनप्रभवम्" – कस्योक्तिरियम्? कथं यौवनप्रभवं तमः अतिगहनं भवति?

(d) "विरला हि तेषामुपदेष्टारः" – केषामुपदेष्टारः कथं वा विरला भवन्ति?

(e) लक्ष्मीमदः कीदृशो भवति?

(f) "महतीयं खल्वनर्थपरम्परा" – अत्रोल्लिखिता अनर्थपरम्परा का?

(g) कथं राजानः सर्वजनस्योपहास्यतामुपयान्ति?

(h) राजानः केभ्यः कुप्यन्ति?

(i) मिथ्यामाहात्म्यगर्वनिर्भराः प्रतारिताः राजानः किं कुर्वन्ति?

(j) मूर्खाः स्तुतिप्रियाः राजानः कान् अभिनन्दन्ति?

(k) लक्ष्मीः कीदृशं पुरुषं खलीकरोति?

(l) "अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः" – उक्तेरस्याः तात्पर्यं लिख्यताम्?

(m) मूर्खा राजानः वृद्धजनोपदेशं किं मन्यन्ते?

2. अधोलिखितयोः कस्यच***नैकस्य*** उत्तरं देयम्। 10×1

(a) शुकनासोपदेशमवलम्ब्य लक्ष्म्याश्चरित्रं वर्ण्यताम्।

(b) महाकविबाणभट्टस्य रचनाशैली मुख्यतः शुकनासोपदेशमाश्रित्य आलोच्यताम्।

**Please Turn Over**

## Section - B

### Unit : II

### (Marks : 20)

**3.** यथेच्छं ***पञ्चानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×5

(a) साधयेयम् इति पदस्य व्युत्पत्तिं लिखत।

(b) बन्दीकृता इति पदं कथं सिध्यति?

(c) व्याहार्षीत् इति पदस्य व्युत्पत्तिं लिखत।

(d) मुनिवेषव्याजेन इत्यस्य सविग्रहं समासं प्रदर्शयत?

(e) निरीक्ष्य इति पदं व्युत्पादयत।

(f) <u>मन्दं</u> व्याहार्षीत् – रेखाङ्कितपदस्य कारकविभक्तिनिर्णयः करणीयः।

(g) आशासन्तानवितानस्य इति पदस्य सविग्रहं समासं लिखत।

**4.** अधःप्रदत्तेषु कस्यचि***देकस्य*** व्याख्या कार्या। (संस्कृतभाषया देवनागरीलिप्या च) 6×1

(a) कार्यं वा साधयेयं देहं वा पातयेयम् – इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनां सतां त्रैवर्णिकस्यार्यकुलस्य, धर्मस्य, भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवाश्रयः।

(b) कथं न भवेदीदृशः? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्।

**5.** अधःस्थितेषु यथाकामम् ***एकस्य*** अनुवादः करणीयः (वङ्गभाषया)। 4×1

(a) तदाकर्ण्य विविध-भाव-भङ्ग-भासुरवदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरङ्गतामङ्गीकृत्य, मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य विजयतां शिववीरः सिद्ध्यन्तु भवतां मनोरथाः इति मन्दं व्याहार्षीत्।

(b) अथ वीर! गृहीतमखिलं वित्तं, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मांस्ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय, कर्तय, ज्वालय; किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्।

## Section - C

### Unit : II

### (Marks : 15)

**6.** यथेच्छं ***विषयद्वय***मादाय संस्कृतभाषया देवनागरीलिप्या च टीका कार्या। 5×2

(a) पञ्चतन्त्रम्

(b) वेतालपञ्चविंशतिका

(c) हितोपदेशः।

**7.** अधोविद्यमानेषु यथेच्छं ***विषयमेकम्*** आश्रित्य टीका लेखनीया। 5×1

(a) सिंहासनद्वात्रिंशिका

(b) पुरुषपरीक्षा